नारायण अथर्वशीर्ष पाँचों अथर्वशीर्ष में सबसे संक्षिप्त और सरल है। अथर्वशीर्ष परम्परा में नारायणाथर्वशीर्ष का विशेष महत्त्व है; क्योंकि जहाँ इसे कृष्णयजुर्वेदीयपरम्परा के उपनिषदों में परिगणित किया गया है, वहीं इसमें चारों वेदों ऋक्, यजुः साम तथा अथर्ववेद का उपदेश-सार 'शिर'(मस्तक)-रूप वर्णित है। इसमें भगवान् नारायण से ही सभी की उत्पत्ति तथा सभी रूप में उन्हीं की अभिव्यक्ति बतायी गयी है। भगवान नारायण अष्टाक्षर मन्त्र 'ॐ नमो नारायणाय' का उपदेश भी इस लघुकाय अथर्वशीर्ष में बताया गया है। इस अथर्वशीर्ष का पाठ करने से चारों वेदों के पाठ का फल प्राप्त होता है। इसके पाठ से मनुष्य सभी पापों से मुक्त हो जाता है, यह इसकी फलश्रुति में बताया गया है। इस अथर्वशीर्ष के पाठ से अन्त में भगवान नारायण का सायुज्य भी प्राप्त हो जाता है।

http://sugamgyaansangam.com के इस पोस्ट में नारायण अथर्वशीर्ष मूल❏➧मन्त्रों के साथ लघु❍शब्द भी दिये गये हैं, जिनकी सहायता से इसे सरलता से पढ़ा जा सकता है। यह शब्दों का सन्धि-विच्छेदन नहीं है। मूलमन्त्र गीताप्रेस गोरखपुर से प्रकाशित किताब पंचदेव अथर्वशीर्ष पर आधारित है। किसी भी अथर्वशीर्ष के पहले और बाद में उसका शान्तिपाठ करने से उसकी सम्यक् फल-प्राप्ति होती है।

●शान्तिपाठ●

❏➧ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै।
तेजस्वि नावधीतमस्तु। मा विद्विषावहै।
ॐ शान्तिः! शान्तिः!! शान्तिः!!!
**❍ ॐ सह ना-ववतु। सह नौ भुनक्तु। सह वीर्यं करवा-वहै।**
**तेजस्वि ना-वधी-तमस्तु। मा विद्विषा-वहै।**
**ॐ शान्तिः! शान्तिः!! शान्तिः!!!**

# नारायण अथर्वशीर्ष

❑➧ॐ अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेती। नारायणात्प्राणो जायते मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी। नारायणाद् ब्रह्मा जायते। नारायणाद्रुद्रो जायते। नारायणादिन्द्रो जायते। नारायणात्प्रजापतिः प्रजायते। नारायणाद् द्वादशादित्या रुद्रा वसवः सर्वाणि छन्दांसि नारायणादेव समुत्पद्यन्ते। नारायणात्प्रवर्तन्ते। नारायणे प्रलीयन्ते। एतदृग्वेदशिरोऽधीते।।१।।

**❍ ॐ अथ पुरुषो ह वै नारायणोऽ कामयत प्रजाः सृजेयेती। नारायणात्-प्राणो जायते मनः सर्वेन्द्रियाणि च। खं वायुर्-ज्योति-रापः पृथिवी विश्वस्य धारिणी। नारायणाद् ब्रह्मा जायते। नारायणाद्-रुद्रो जायते। नारायणा-दिन्द्रो जायते। नारायणात्-प्रजापतिः प्रजायते। नारायणाद् द्वादशा-दित्या रुद्रा वसवः सर्वाणि छन्दांसि नारायणादेव समुत्पद्यन्ते। नारायणात्-प्रवर्तन्ते। नारायणे प्रलीयन्ते। एत-दृग्वेद-शिरोऽधीते।।१।।**

❑➧अथ नित्यो नारायणः। ब्रह्मा नारायणः। शिवश्च नारायणः। शक्रश्च नारायणः। कालश्च नारायणः। दिशश्च नारायणः। विदिशश्च नारायणः। ऊर्ध्वं च नारायणः। अधश्च नारायणः। अन्तर्बहिश्च नारायणः। नारायण एवेदं सर्वं यद्भूतं यच्च भव्यम्। निष्कलङ्को निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित्। य एवं वेद स विष्णुरेव भवति स विष्णुरेव भवति। एतद्यजुर्वेदशिरोऽधीते।।२।।

**❍ अथ नित्यो नारायणः। ब्रह्मा नारायणः। शिवश्च नारायणः। शक्रश्च नारायणः। कालश्च नारायणः। दिशश्च नारायणः। विदिशश्च नारायणः। ऊर्ध्वं च नारायणः। अधश्च नारायणः। अन्तर्-बहिश्च नारायणः। नारायण एवेदं सर्वं यद्-भूतं यच्च भव्यम्। निष्कलङ्को निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित्। य एवं वेद स विष्णुरेव भवति स विष्णुरेव भवति। एतद्-यजुर्वेद-शिरोऽधीते।।२।।**

❑➧ओमित्यग्रे व्याहरेत्। नम इति पश्चात्। नारायणायेत्युपरिष्टात्। ओमित्येकाक्षरम्। नम इति द्वे अक्षरे। नारायणायेति पञ्चाक्षराणि। एतद्वै नारायण स्याष्टाक्षरं पदम्। यो ह वै नारायणस्याष्टाक्षरं पदमध्येति। अनपब्रुवः सर्वमायुरेति। विन्दते प्राजापत्यं रायस्पोषं गौपत्यं ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति। एतत्सामवेदशिरोऽधीते।।३।।

**❍ ओमित्यग्रे व्याहरेत्। नम इति पश्चात्। नारायणाये-त्युप-रिष्टात्। ओमित्ये-काक्षरम्। नम इति द्वे अक्षरे। नारायणायेति पञ्चा-क्षराणि। एतद्-वै नारायण स्याष्टाक्षरं पदम्। यो ह वै नारायण-स्याष्टाक्षरं पदमध्येति। अनप-ब्रुवः सर्वमायु-रेति। विन्दते प्राजा-पत्यं रायस्पोषं गौपत्यं ततो-ऽमृतत्व-मश्नुते ततो-ऽमृतत्व-मश्नुत इति। एतत्-सामवेद-शिरोऽधीते।।३।।**

❑➧प्रत्यगानन्दं ब्रह्मपुरुषं प्रणवस्वरूपम्। अकार उकारो मकार इति। ता अनेकधा समभवत्तदेतदोमिति। यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात्। ॐ नमो नारायणायेति मन्त्रोपासको वैकुण्ठभुवनं गमिष्यति। तदिदं पुण्डरीकं विज्ञानघनं तस्मात्तडिदाभमात्रम्। ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः। ब्रह्मण्यः पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरच्युत इति। सर्वभूतस्थमेकं वै नारायणं कारणपुरुषमकारणं परं ब्रह्मोम्। एतदथर्वशिरोऽधीते।।४।।

**❍ प्रत्यगा-नन्दं ब्रह्म-पुरुषं प्रणव-स्वरूपम्। अकार उकारो मकार इति। ता अनेकधा सम-भवत्-तदेतदो-मिति। यमुक्त्वा मुच्यते योगी जन्म-संसार-बन्धनात्। ॐ नमो नारायणायेति मन्त्रो-पासको वैकुण्ठ-भुवनं गमिष्यति। तदिदं पुण्डरीकं विज्ञान-घनं तस्मात्-तडिदाभ-मात्रम्। ब्रह्मण्यो देवकी-पुत्रो ब्रह्मण्यो मधुसूदनः। ब्रह्मण्यः पुण्डरी-काक्षो ब्रह्मण्यो विष्णु-रच्युत इति। सर्व-भूतस्थ-मेकं वै नारायणं कारण-पुरुष-मकारणं परं ब्रह्मोम्। एतद-थर्व-शिरोऽधीते।।४।।**

❑➧प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायमधीयानो दिवसकृतं पापं नाशयति। तत्सायं प्रातरधीयानः पापोऽपापो भवति। मध्यन्दिनमादित्याभिमुखोऽधीयानः पञ्चमहापातकोपपातकात्प्रमुच्यते। सर्ववेदपारायणपुण्यं लभते। नारायणसायुज्यमवाप्नोति श्रीमन्नारायण सायुज्यमवाप्नोति य एवं वेद।।५।।

**❍ प्रातर-धीयानो रात्रि-कृतं पापं नाशयति। सायम-धीयानो दिवस-कृतं पापं नाशयति। तत्-सायं प्रातर-धीयानः पापोऽपापो भवति। मध्यन्-दिन-मादित्या-भिमुखोऽ-धीयानः पञ्च-महा-पातको-पपातकात्-प्रमुच्यते। सर्व-वेद-पारायण-पुण्यं लभते। नारायण-सायुज्यम-वाप्नोति श्रीमन्नारायण सायुज्यम-वाप्नोति य एवं वेद।।५।।**

।।इत्युपनिषत्।।

● शान्तिपाठ ●

❑➧ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै।
तेजस्वि नावधीतमस्तु। मा विद्विषावहै।
ॐ शान्तिः! शान्तिः!! शान्तिः!!!

**❍ ॐ सह ना-ववतु। सह नौ भुनक्तु। सह वीर्यं करवा-वहै।**
**तेजस्वि ना-वधी-तमस्तु। मा विद्विषा-वहै।**
**ॐ शान्तिः! शान्तिः!! शान्तिः!!!**

**http://sugamgyaansangam.com**

**YOUTUBE CHANNEL**

**SUGAM GYAAN SANGAM**

**&**

**SAHI GYAAN DISHA**